**अज्ञानाश्रयता** ( ajñānāśraya-tā ) *f.* the state of being the substratum of nescience अहं न ज्ञातवानिति स एव ह्यज्ञानाश्रयतया प्रतिसंधीयते S'atDū. 122. 27; GuruCandr. iii. 12. 15; जीवत्वं तु ··· अज्ञानाश्रयतावच्छेदकं वक्ष्यत एव LaCandr. 578. 26; 44. 5.

**अज्ञानाश्रयत्व** ( ajñānāśraya-tva ) *n* the state of being the substratum of nescience न चाज्ञानप्रमाणगम्यमेवाज्ञानाश्रयत्वक्षमं जडमन्यदस्तीतीष्यते त्वया । नापि मया । अन्तःकरणादीनां चानित्यत्वादज्ञानाश्रयत्वानुपपत्तिः IṣṭaSi. 195. 13; ज्ञानाश्रयत्वविरहिणां घटादीनां हि नाज्ञानाश्रयत्वं दृष्टम् NītiMā. 23. 11; TarkSaṁ.( Ā. ) 138. 4; ननु कल्पितं ज्ञातृत्वं ब्रह्मणः ···अस्तीति तस्याज्ञानाश्रयत्वोपपत्तिरिति चेन्न ··· संविदात्मन एवाज्ञानाश्रयत्वाभ्युपगमात् S'atDū. 107. 18; 107. 3; अज्ञानाश्रयत्वधीबलादेवाहमर्थोऽकल्पितः ··· अस्तु Nyāyāmṛ. 340A. 7; बुद्धेरेवाज्ञानाश्रयत्वापातात् Nyāyāmṛ. 341B. 8; सर्वज्ञस्याज्ञानाश्रयत्वभङ्गः Nyāyāmṛ. 349B. 9; 339A. 8; तत्राप्यज्ञानाश्रयत्वापत्तिः ··· न हि ज्ञातृत्वाध्यासोऽज्ञानाश्रयत्वे प्रयोजकः AdvaiSi. 578. 11; अज्ञानाश्रयत्वयोग्यव्यक्त्यन्तरस्याभावात् AdvaiSi. 580. 1; 577. 12; शुद्धचितोऽज्ञानाश्रयत्वविषयकप्रत्ययान्तराभावात् GuruCandr. ii. 367. 17; शुद्धस्य ··· अज्ञानाश्रयत्वात्तस्य च वृत्त्यादिरूपज्ञानानाश्रयत्वम् LaCandr. 563. 40; अज्ञानाश्रयत्वेन अनावृतं चैतन्यम् JñānBiPra. 2. 6.

**अज्ञानाश्रयभूत** ( ajñānāśraya-bhūta ) *adj.* which has become the substratum of nescience अज्ञानाश्रयभूताहमर्थानुभवोऽभ्युपगन्तव्यः S'rutaPra. iA. 167. 25 (*on* i. 1. 1); ननु क एवमाह अज्ञानाश्रयभूतं ब्रह्मेति S'atDū. 108. 15.

**अज्ञानाश्रयीभूत** ( ajñānāśrayī-bhūta ) *adj.* which has turned into the substratum of nescience चैतन्यम् ··· अज्ञानाश्रयीभूतं च जीवः SiddhāBi. 47. 3; AdvaiSi. 548. 4.

**अज्ञानाश्रित** ( ajñānāśrita ) *adj.* residing in nescience अज्ञानकार्यत्वादहमर्थोऽज्ञानाश्रितः GuruCandr. iii. 12. 23 = LaCandr. 578. 32.

**अज्ञानासंसृष्ट** ( ajñānāsaṁsṛṣṭa ) *adj.* not associated with ignorance अज्ञानासंसृष्टवस्तुप्रदर्शनेनाज्ञानात् निवर्तितवान् PrakaVi. 64. 12.

**अज्ञानासंस्पृष्ट** ( ajñānāsaṁspṛṣṭa ) *adj.* not touched by nescience ( वेदाहमेतं पुरुषम्···तमसः परस्तात् ) अज्ञानासंस्पृष्टमित्यर्थः PrakaVi. 631. 17.

**अज्ञानासङ्ग** ( ajñānāsaṅga ) *m.* **i** attachment caused by nescience स्वाभाविकादज्ञानासङ्गप्रयुक्तात् कर्मलक्षणान्मृत्योः अतिमुक्तिर्व्याख्याता BṛĀraUBh. 360. 5 (*on* i. 5. 4); **ii** attachment to or association with ignorance कृता वैडूर्याशा विततकिरणे काचशकले यदज्ञानासङ्गादविबुधजने सेवनरतिः Pañcā. 60. 29.

**अज्ञानासत्त्व** ( ajñānāsattva ) *n.* absence of nescience विदेहत्वप्रयोजकब्रह्मसाक्षात्कारोत्पत्तिक्षणे ब्रह्म साक्षात्करोमीत्यनुभवेनाज्ञानासत्त्वेऽपि LaCandr. 155. 35.

**अज्ञानासमन्वित** ( ajñānāsamanvita ) *adj.* not related to nescience न च ज्ञात्रनुरोधिन्या दृष्ट्याज्ञानासमन्वितम् । आत्मात्मानमलं द्रष्टुं रूपं श्रोत्रधिया यथा BṛĀraUBhVā. i. 4. 1385.

**अज्ञानासंभव** ( ajñānāsambhava ) *m.* impossibility of nescience अज्ञानव्यतिरेकेण असत इव जडस्यापि स्वरूपासिद्धेः तस्य तत्र चाज्ञानासंभवात् स्वरूपेण स्वाविद्यया वा जडस्याप्यात्माज्ञानातिरिक्तस्य व्यवहारास्पदत्वं संभवतीति नाशङ्कनीयम् IṣṭaSi. 200. 9; अज्ञानासंभवादेव मिथ्याभेदो निराकृतः AnuVyā. 2B. 11 (*on* i. 1. 1); MāyāKha. 2A. 11; यथा जगत्तमोनाशमुद्दिश्य सवितुः प्रवृत्तिः न तु शशशृङ्गीयतमोनाशमुद्दिश्य तस्यालीकत्वेनाज्ञानासंभवात् LaCandr. 470. 20; 597. 33.

**अज्ञानासिद्ध** ( ajñānāsiddha ) *adj.* (a type of fallacy) with an unestablished (probans) due to ignorance यद्वा वादिनोऽज्ञानासिद्धः यदि वा प्रतिवादिनः विपर्ययासिद्धः ··· प्रतिवादिनः अज्ञानासिद्धो यद्वा विपर्ययासिद्धो भवति वादिनः प्रतिवादिनः सन्देहासिद्ध एवमाश्रयोऽपीति योजनीयम् NyāyKa. 240. 20; अज्ञानासिद्धो यथा- देवदत्तो बहुधनो भविष्यति तद्धेतुभूतादृष्टाश्रयत्वादिति TārkiRa. 226. 9; अज्ञानासिद्धो यथा- सर्वं क्षणिकं सत्त्वादिति व्याप्त्यज्ञानादसिद्धः SarvaDaKau. 47. 5; यत्र पक्षाद्व्यतिरेकाभावेन पक्षसंबन्धित्वं नास्ति स व्यतिरेकासिद्धः । यथा अनित्यं गगनं गगनत्वादिति । अत्र गगनस्वरूपादन्यत् गगनत्वं नास्ति इति । एषां स्वरूपादीनामज्ञानेऽज्ञानासिद्धः संदिग्धासिद्धो वा भवति MānaMe. 72. 6.

**अज्ञानासिद्धि** ( ajñānāsiddhi ) *f.* non-establishment of (the probans) due to ignorance ( विवादाध्यासितं तन्त्रं प्रमाणम्···। निर्दोषज्ञानजन्मत्वात्···नापि हेतोरनैकान्तिकत्वादयो दोषाः ) न तावदज्ञानासिद्धिः तत्प्रतिपादकशब्दोच्चारणात् ĀgaPrā. 32. 19; अज्ञानासिद्धिस्त्वप्रसिद्धार्थपदप्रयोगे दर्शयितव्या NyāyRa. 372. 7 (*on* 5(4). 78); व्याप्त्यादीनां त्रयाणामन्यतमस्य प्रतीत्यभावे त्वज्ञानासिद्धिः TārkiRa. 225. 6; व्याप्तत्वे सति पक्षधर्मतया प्रमितिर्हि हेतोः सिद्धिः तदभावश्च व्याप्तेः पक्षस्य तद्धर्मस्य तत्प्रमितेर्वा खल्वभावात् स्यात् । तत्र च व्याप्यत्वासिद्धिराश्रयासिद्धिः स्वरूपासिद्धिस्तत्रैवाज्ञानासिद्धिरिति समाख्यानिवेशः NyāyPari. 281. 11; धूमानुमानादिष्वेवाविदितधूमादिस्वरूपस्याज्ञानासिद्धिः NyāyPari. 284. 4; ( शैवाद्यागमसंप्राप्तदृष्टगेन फलेन तु । तद्वाक्योपमयान्यच्च प्रमाणत्वेऽनुमीयते ) अज्ञानासिद्धिं परिहर्तुमुक्तं दृष्टगेनेति NyāySu.( Ja. ) 108A. 1 (*on* i. 1. 3); व्याप्त्यभावाद् व्याप्यत्वासिद्धिः । पक्षाभावादाश्रयासिद्धिः । पक्षधर्मताभावात् स्वरूपासिद्धिः । एतेषामन्यतमज्ञानाभावादज्ञानासिद्धिः SarvaDaKau. 46. 6.

**अज्ञानास्वीकार** ( ajñānāsvīkāra ) *m.* non-acceptance of nescience इदमंशेऽज्ञानास्वीकारपक्षेऽपि···अज्ञाननाशकत्वं बोध्यम् LaCandr. 655. 14.

**अज्ञानाहतचेतस्** ( ajñānāhata-cetas ) *adj.* whose mind is overpowered with ignorance अज्ञानाहतचेतसामतिरुषां कोऽर्थस्तिरश्चां गुणैः Subhāṣi. 458.

**अज्ञानाहान** ( ajñānāhāna ) *n.* non-destruction of ignorance अज्ञानाहाने च मानवैफल्यात्तत्प्रवृत्त्या विशेषाभावात् IṣṭaSi. 369. 19.

**अज्ञानाहानि** ( ajñānāhāni ) *f.* negation of the loss of ignorance अज्ञाननाशोऽप्यज्ञानजश्चेत् तदात्मा तत्रैव स्यादित्यज्ञानाहानिः IṣṭaSi. 365. 14.

**अज्ञानाहित** ( ajñānāhita ) *adj.* caused by ignorance हृदि चिन्तितवानेवमज्ञानाहितदुर्मतिः PārśvC. 2. 502.

**अज्ञानिकवादिन्** ( ajñānika-vādin ) *m.* agnostic, who denies the existence of knowledge अज्ञानमभ्युपगमद्वारेण येषामस्ति ते अज्ञानिकाः त एव वादिनोऽज्ञानिकवादिनः SthānṬ. 268A. 6.

**अज्ञानिजन** ( ajñāni-jana ) *m.* ignorant people अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः AparoAnu. 97; कारणान्तरं निरपेक्ष्य स्वयमेव यथादित्यः स्वपरप्रकाशरूपं तेजो भवति···तथा चाज्ञानिजनानां देवता भवति TātpaVṛ. 87. 16.

**अज्ञानिज्ञानदान** ( ajñāni-jñānadāna ) *n.* imparting knowledge to the ignorant सर्वं ज्ञानं च यज्ञश्च ···। अज्ञानिज्ञानदानस्य कलां नार्हन्ति षोडशीम् DevīBhāP. ix. 38. 5.

**अज्ञानितम** ( ajñāni-tama ) *adj.* most ignorant कुशला ब्रह्मवार्तायां वृत्तिहीनाः सुरागिणः । तेऽप्यज्ञानितमा नूनं पुनरायान्ति यान्ति च AparoAnu. 133.

**अज्ञानिता** ( ajñāni-tā ) *f.* the state of being ignorant नाज्ञानितावगतिरस्ति वशित्वहेतोः SaṁkṣeS'ā. 2. 81 (ii. 110. 22); PañcDa. 7. 14.

**अज्ञानित्व** ( ajñāni-tva ) *n.* the state of being ignorant नानात्मनोऽज्ञानित्वम् NaiṣkaSi. 105. 3; प्रत्यग्ब्रह्मण एवाज्ञानित्वमभ्युपगन्तव्यम् PañcPra. 55. 2; 69. 7; न च···मुक्तस्याज्ञानित्वसंसारित्वादिप्रसङ्गः ĀtmaSi. 31. 19; Bhāsk. i. 125. 11 (*on* ii. 3. 13); न चाज्ञानिनां भगवत्संसर्गोऽननुरूप एवेति वाच्यम् । एवं तर्हि तक्रविक्रयकर्तृत्वेनैवाज्ञानित्वलाभे वराटिकालोभरूपहेतूपन्यासस्यानतिप्रयोजनकत्वापत्तेः RasGaṅ. 681. 6.

**अज्ञानिन्** ( a-jñānin ) *adj.* **i** not having right knowledge, possessing wrong knowledge ऊचुर्लक्षणिका ये मां पुत्रिण्यविधवेति च । तेऽद्य सर्वे हते रामेऽज्ञानिनोऽनृतवादिनः Rāmā. vi. 38. 2; परमज्ञानिनो मूर्खा वदन्ति तामसं शिवम् BrahmVaiP. i. 8. 21; अज्ञानी भूसुरो यस्तु त्यजेद् ( दत्ताम् ) भूमिं विमोहितः ।···भवेच्चात्यन्तदुःखभाक् PadmP. iii. 24. 8; अज्ञानिनो भवन्त्येते दिव्यज्ञानपरिच्युताः ( विप्राः ) BṛKathāK. 76. 68; **ii** ignorant, dull, stupid, not learned अज्ञानं तामसो भावः कार्यारम्भप्रवृत्तयः । अज्ञानिनां प्रवर्तन्ते कर्मलोपास्ततो द्विज ViṣṇuP. vi. 5. 25; तेषामज्ञानिनां पूर्वमाद्ये स्वायम्भुवेऽन्तरे । उत्पद्यन्ते हि शास्त्राणां द्वापरे परिपन्थिनः BrahmāṇḍP. i. 31. 22; अज्ञानतः कृते दण्डं पातयन्ति बुधा यदि । बुधेभ्यस्तमहं मन्ये वरमज्ञानिनो नराः MārkP. 112. 19; ( गङ्गे ) अज्ञानी त्वज्जलस्पर्शाद्यदि प्राणान् समुत्सृजेत् । तस्मै ददामि सारूप्यम् BrahmVaiP. ii. 10. 81; अज्ञानी कातरः शोके विपत्तौ च न पण्डितः BrahmVaiP. ii. 17. 70; iv. 76. 80; एतावत्येव धौरेयं सर्वभूतभवावनिः । सीदन्त्यज्ञानिनो यस्याम् MṛgendraT. i. 13. 155; अज्ञानिना यत्कृतकर्मजातं कृतार्थमप्यत्र विगर्हणीयम् KalyāKā. 7. 50; अज्ञानी मूर्खतोपेतो मत्स्यः स्वार्थपरिच्युतः BṛKathāK. 147. 9; हतं ज्ञानं क्रियाशून्यं हता चाज्ञानिनः क्रिया YaśasCam. ii. 271. 12; ii. 409. 21; पुत्रार्थं क्लिश्यते लोकः किं पुत्रेण भविष्यति । ज्ञानी वाप्यथवाज्ञानी ( पुत्रः ) BrahmP. 104. 4; अज्ञानिनोऽपि वा गृहस्थैर्यतयः पूज्याः VṛGautaSm. 588. 17 (12); न खलु ज्ञानप्रसक्तिशून्यो घटादिरज्ञानीत्युच्यते ĀtmaSi. 28. 14; अतस्त्वं ब्राह्मणो भूत्वा पौलस्त्यतनयश्च सन् । अज्ञानीव सदा भोगाननुधावसि किं मुधा AdhyāRā. vi. 4. 53; शापितो विष्णुः सर्वज्ञत्वं तवास्ति यत् । किंचित्कालं हि तत् त्यक्त्वा त्वमज्ञानी भविष्यसि YogVā. i. 1. 60; S'rīKaC. 1. 36; न चाज्ञानिनां भगवत्संसर्गोऽननुरूप एव RasGaṅ. 681. 5; **iii** unaware of the fact, innocent प्रसह्य यद् उक्तं हे कृष्ण ··· अज्ञानिना ( मया ) GītāBh.( S'aṅ. ) 327. 2 (*on* 11. 41); द्विविधा रज्जुर्ज्ञानिनोऽज्ञानिनोऽनिशम् AparoAnu. 68; रज्जुखण्डलकमप्यज्ञातमज्ञानिभिर्मायावीति गिरोच्यताम् SaṁkṣeS'ā. 3. 102 (ii. 209. 14); ( तारकोत्पत्तौ ) बहूत्पाता जज्ञिरे मुनिसत्तम । अज्ञानिनो जनास्तत्र मेनिरे विश्वसंप्लवम् S'ivaP. ii(3). 15. 17 (139A. 11); गुप्तापराधः सन् अज्ञानीवागच्छन् शठः S'ṛṅgāMañ.( A. ) 49. 21; **iv** lacking spiritual knowledge अविद्यायां बहुधा वर्तमानाः···बालाः अज्ञानिनः MuṇḍUBh. 319. 10 (*on* i. 2. 9); अज्ञानिना आरुरुक्षुणा सर्वकर्माणि सर्वदा अनुष्ठेयानि SanatBh. 184. 10 (*on* 1. 6); अज्ञानिनो भवति दुःखमनेन क्लृप्तम् SaṁkṣeS'ā.